श्रीः
श्रीमते रामानुजाय नमः
श्रीमते निगमान्तमहादेशिकाय नमः
श्रीमहालक्ष्म्यै नमः

श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे

# ॥ चित्रचरित्रस्तबकः षोडशः ॥

*This document has been prepared by*

*Sunder Kidāmbi*

*with the blessings of*

**श्री रङ्गरामानुज महादेशिकन्**

*His Holiness  śrīmad āṇḍavan śrīraṅgam*

श्रीः

श्रीमते रामानुजाय नमः

श्रीमते निगमान्तमहादेशिकाय नमः

श्रीमहालक्ष्म्यै नमः

# ॥ चित्रचरित्रस्तबकः षोडशः ॥

पवित्रं पद्मनाभस्य कलत्रं तत्पुनातु नः।
विचित्रं त्रिषु लोकेषु चरित्रं यस्य गीयते ॥ **16.1** ॥

अप्राकृतेऽपि भगवानवताररूपे
प्रायः प्रजानुगुणमेव करोति जन्म।
मातस्त्वया हि मथिते प्रथमे हि भूते
चित्रं पुरा जनिरकारि तथा द्वितीये ॥ **16.2** ॥

ख्यातो भुवि ज्वलनशीतलिमानुमानं
बाधानुविद्धमिति तार्किकसम्प्रदायः।
वालानले कमलवासिनि वायुसूनोः
चित्रं चकर्थ कृपया शिशिरं त्वमेव ॥ **16.3** ॥

निमग्नमग्नौ किल वस्तु भूयो -
ऽप्युन्मज्जतीति क्व नु देवि दृष्टम्।
वपुर्विचित्रं तव वह्निमग्नम्
उन्मज्जनं मज्जननि प्रपेदे ॥ **16.4** ॥

स्वबाधकान् साधुजनोऽपि शक्तौ
बाधेत पाथोधिसुते जगत्याम्।
बाधाविधात्रीर्भवती ररक्ष
रक्षःस्त्रियः प्रत्युत वायुपुत्रात् ॥ **16.5** ॥

शोकादपेतः स तवावलोकात्
    पाकारिपाकः किल काक एकः।
लोकाननेकान् लभते स्म चित्रं
    नाकाधिपार्थ्यानपि वृद्धगृध्रः॥ **16.6** ॥

प्रायः स्त्रियः पत्युरतिप्रियाश्चेत्
    पद्मे सदा पार्श्वमुपाश्रयन्ते।
निरन्तरं त्वं तु निधीयसेऽहो
    भुजान्तरे भोगिनगेश्वरेण॥ **16.7** ॥

कान्तः प्रियां वहति कामवशाद् दृशीति
    वाङ्मात्रमेव भुवि शुश्रुम वार्धिकन्ये।
आश्चर्य मब्जनयनो हरिरब्जगा त्वं
    युक्तं ततो दृशि बिभर्ति तव प्रियस्त्वाम्॥ **16.8** ॥

सर्वे किञ्चित्कुर्वतः स्वानुकूलान्
    संरक्षन्तः प्रेक्षिताः सिन्धुकन्ये।
अञ्जल्यज्ञानार्जितागः प्रपञ्चान्
    अस्मादृक्षानप्यहो रक्षसि त्वम्॥ **16.9** ॥

दृष्टा वेणुं जडमपि जना देवि वाचालयन्तः
    कृष्णोऽप्येनं मुखरयति चेत्किं पुनस्तत्र चित्रम्।
श्लोकान् मूकानपि च भवती वादयत्यप्रयत्नात्
    चित्रं शौरेः सखि वयममी तत्र दृष्टान्तभूताः॥ **16.10** ॥

मादृक्षरक्षणकृते मकराङ्कमातः
    बाहान्तरे करुणया भवती निविष्टा।
अर्चात्मना ध्रुवमवस्थितमञ्जनाद्रौ
    विश्वम्भरं विविधकार्यकरं करोति॥ **16.11** ॥

**विश्वप्रसूरपि त्वं विचित्रमुरगेन्द्रशैलपतिकान्ते।**
**मन्मात्रासाधारणमातेव विशिष्य पुष्यसि रमे माम्॥ 16.12 ॥**

॥ इति श्रीमद्वेङ्कटाध्वरिविरचिते श्रीलक्ष्मीसहस्रे चित्रचरित्रस्तबकः षोडशः॥